**E4VGFT2**

# संस्कृतम् सम्प्रेषणात्मकम्

## कक्षा - नवमी

## सङ्कलनात्मकं मूल्याङ्कनम् ( प्रथम्सत्रम् )-2013

**निर्धारित समय : होरात्रयम्** **पूर्णाङ्काः 90**

### निर्देशाः

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्तिः

खण्डः (क) अपठित-अवबोधनम् - **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् - **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् - **35 अङ्काः**

(ii) सर्वेप्रश्नाः**अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** 10

आधुनिकयुगे यन्त्रादीनां सञ्चालनाय, पाककर्मणि च सूर्योर्जसः उपयोगः भवति। ग्रामेषु यत्र विद्युत्साधनानि अल्पानि सन्ति तत्र दिने यन्त्रमाध्यमैः एकत्रितं सूर्योर्जः विद्युदिव प्रयुज्यते। इदानीं कृषिकर्मसु अपि अस्य उपयोगः क्रियते। कूपजलैः क्षेत्राणां सेचनार्थं नूतनानि यन्त्राणि सूर्यशक्त्या सञ्चालितानि सन्ति। जीवानां स्वास्थ्याय अपि सूर्यस्य महती भूमिकास्ति। कतिपयाः योगक्रियाः अस्यातपे एव क्रियन्ते। अस्य रश्मीनां प्रभावेण त्वचः अपि अनेके रोगाः नश्यन्ति। चिकित्साक्षेत्रेऽपि प्राकृतिकचिकित्सारूपेण सूर्यः अस्माकम् उपकारकः। शारीरिकशास्त्रे सूर्यस्य रश्मिसेवनं 'सूर्यस्नानम्'

इति रूपेण प्रसिद्धम्। अनया क्रियया सूर्योर्जसः 'विटामिन डी' इति प्राप्यते यः स्वास्थ्यस्य संपोषकः स्वीक्रियते। एवमेव पर्यावरणरक्षणे अपि सूर्यस्य योगदानम् अविस्मरणीयम् अस्ति यतो हि अस्य रश्मयः जले शैत्यं पावनत्वं च सम्पादयन्ति।

**(I) एकपदेन उत्तरत।**

(i) केषां स्वास्थ्याय सूर्यस्य महती भूमिकास्ति?

(ii) सेचनार्थं नूतनानि यन्त्राणि कया सञ्चलितानि सन्ति?

**(II) पूर्णवाक्येन उत्तरत।**

(i) ग्रामेषु यत्र विद्युत्साधनानि अल्पानि सन्ति तत्र किं प्रयुज्यते?

(ii) 'सूर्यस्नानम्' किं भवति?

**(III) यथानिर्देशमुत्तरत –**

(i) 'नगरेषु' इति शब्दस्य विपरीतार्थकं पदम् अनुच्छेदात् चित्वा लिखत।

(अ) कृषिकर्मसु (ब) आधुनिकयुगे

(स) ग्रामेषु (द) क्षेत्राणाम्

(ii) ''जीवानां ----- भूमिकास्ति'' अस्यां पंक्तौ 'भूमिका' इति पदस्य विशेषणपदं किम्?

(अ) स्वास्थ्याय (ब) सूर्यस्य

(स) अपि (द) महती

(iii) 'उपकारं करोति यः' इत्यर्थे कः शब्दः अनुच्छेदे प्रयुक्तः?

(अ) उपयोगः (ब) उपकारकः

(स) अल्पानि (द) इदानीम्

(iv) अनुच्छेदे 'नश्यन्ति' इति क्रियापदस्य कर्तृपदम् किम्?

(अ) त्वचः (ब) अपि

(स) रोगाः (द) अनेके

**(IV)** अस्य अनुच्छेदस्य कृतेउचितं शीर्षकं लिखत।

## खण्डः 'ख'

## रचनात्मकं-कार्यम् - ( 15 अङ्काः )

2 भवत्याःनाम अनीशा अस्ति।भवत्याःभगिनी गुंजनःलण्डननगरेवसति।तस्याःसंस्कृतभाषायां रुचिःवर्तते।तस्याः उत्कण्ठां शमयितुम् लिखितम् इदं पत्रं मञ्जूषायां दत्तैःपदैःपूरयित्वापुनः उत्तरपुस्तिकायां लिखत। 5

रोहिणी

___(i)___

तिथिः______

प्रियेभगिनि___(ii)___ !

सप्रेम नमोनमः।

अद्य मया___(iii)___पत्रं प्राप्तम्। संस्कृतविषयेतव अभिरुचिं ___(iv)___प्रसन्नता अभवत्।संस्कृतभाषासर्वासां ___(v)___ जननी अस्ति।पाणिनेःव्याकरणस्य उपयोगः___(vi)___ अपि अस्ति। अस्याःविशालःशब्दकोषः अद्वितीयः अस्ति।समृद्ध-संस्कृतसाहित्यस्यवैभवं अभूतपूर्वम् अस्ति। अधुनावैदेशिक-विद्वांसः अपि___(vii)___ महत्त्वं स्वीकुर्वन्ति। मनोयोगेन त्वं संस्कृतभाषायाः___(viii)___ कुरु इति मम निवेदनम्। शेषमत्र कुशलम्। शीघ्रं प्रत्युत्तरंप्रेषय।


तव___(ix)___

___(x)___

**मञ्जूषा**

संगणकयन्त्रे, ज्ञात्वा, अध्ययनम्, गुंजन, नवदिल्लीतः, तव, भगिनी, संस्कृतभाषायाः, भाषाणाम्, अनीशा

3(i) **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** 10



**मञ्जूषा**

| |
|---|
| सूर्यः, वृक्षाः, मयूरः, उदेति, नृत्यति, बालकौ, कन्दुकेन, बालिका, पुष्पाणि, उद्यानम्, धावतः, क्रीडति, बकौ, खगाः हरीतिमा, परस्परम्, प्रसन्नाः |

**अथवा**

3(ii) मञ्जूषायां प्रदत्तशब्दानां सहायतया 'विद्यालयस्य उत्सवः' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत। 10

**मञ्जूषा**

| |
|---|
| सज्जा, प्रबन्धः, पारितोषिक-वितरणम्, वार्षिकसमारोहः, सर्वे कर्मचारिणः व्यस्ताः, भूषयन्ति, पताकाभिः, अलंकुर्वन्ति, सभाध्यक्षः, सांस्कृतिक-कार्यक्रमः |

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )

4 (i) दिव्यः' कः वर्णः दन्त्यः अस्ति? 4

(ii) 'अ' 'प' वर्णयोः कस्य उच्चारणस्थानं ओष्ठौ स्तः?

(iii) वर्णसंयोजनेन पदनिर्माणम् क्रियताम् -

क् अ म् अ ल् अ म्

| | | | |
|---|---|---|---|
| | | (iv) वर्णविन्यासेरिक्तस्थानं पूरयत —<br>प्रयच्छति — प् र् अ य् अ ........ छ् अ त् इ | |
| | 5 | **प्रदत्तविकल्पेभ्यः रेखाङ्कितपदानि आश्रित्य उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत** –<br><br>(i) <u>अद्यावकाशः</u> अस्ति।<br>(अ) अद्य+अवकाशः (ब) अद्यौ+अकाशः<br>(स) अद+यवकाशः (द) आदि+अवकाशः<br><br>(ii) <u>सूर्य+उदयः</u> तमः हन्ति।<br>(अ) सूर्युदययः (ब) सूर्यौदयः<br>(स) सूर्येदय (द) सूर्योदयः<br><br>(iii) <u>अहम्+वाटिकां</u> गमिष्यामि।<br>(अ) अहमवाटिकां (ब) अहं वाटिकां<br>(स) अहमावाटिकां (द) अहम् वाटिकां<br><br>(iv) दानेन तुल्यो <u>निधिरस्ति</u> नान्यः।<br>(अ) निधि+अस्ति (ब) निधी+अस्ति<br>(स) निधि+रस्ति (द) निधिः+अस्ति<br><br>(v) <u>वाक्+ईशः</u> मम मित्रम् अस्ति।<br>(अ) वाकीशः (ब) वागीशः<br>(स) वाकेशः (द) वागेशः | 5 |
| | 6 | **उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत** – | 5 |

(i) अयं तु ___ कुटजः अस्ति।

(अ) साधौ (ब) साधोः

(स) साधो (द) साधुम्

(ii) ___ सह लक्ष्मीः अपि अस्ति।

(अ) हरिणा (ब) हरेः

(स) हरये (द) हरिम्

(iii) प्रभाकरः ___ क्रीणाति।

(अ) फलस्य (ब) फलाय (स) फलानि (द) फलैः

(iv) तस्याः ___ परिधानं सुंदरम् अस्ति।

(अ) महिलया (ब) महिलायाः

(स) महिलायै (द) महिलाम्

(v) ___ बालिकायै पुस्तकम् **आनयः** सा तु गता।

(अ) यस्य (ब) यस्यै

(स) यस्मै (द) यस्याः

7 **उचितधातुरूपाणि चित्वा रिक्त-स्थानानि पूरयत।** 5

(i) सत्यस्य सर्वत्र विजयः ___। धैर्येण कार्यं कुरु।

(अ) भविष्यति (ब) भविष्यतः

(स) भविष्यसि (द) भविष्यामि

(ii) वयम् देशभक्ताः ___।

(अ) सन्ति (ब) स्थ

(स) स्मः (द) स्थः

(iii) परिश्रमिणः जनाः सफलताम् ___।

| | | | |
|---|---|---|---|
| | | (अ) लभते (ब) लभध्वे<br>(स) लभेते (द) लभन्ते<br>(iv) सूर्यस्य प्रकाशेन तमः ___ ।<br>(अ) अनश्यन् (ब) अनश्यत्<br>(स) अनश्यताम् (द) अनश्यः<br>(v) पुत्रः मातरं ___ ।<br>(अ) सेवते (ब) सवेते<br>(स) सेवसे (द) सेवन्ते | |
| | 8 | **कोष्ठकगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि पूरयत।**<br>(i) (उद्यान) __________ परितः पुष्पाणि सन्ति।<br>(ii) पुत्रः (जनक) __________ सह गच्छति।<br>(iii) (श्रीगणेश) __________ नमः।<br>(iv) छात्रः (कक्षा) __________ बहिः तिष्ठति।<br>(v) (अस्मद्) __________ पुरतः श्यामः गच्छति। | 5 |
| | 9 | **रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं लिखत।**<br>(i) कोकिलानां गीतम् <u>आ+कर्ण+ल्यप्</u> सर्वे मोदन्ते।<br>(ii) जनाः मिष्टान्नानि <u>पच्+क्त्वा</u> मित्रेभ्यः यच्छन्ति।<br>(iii) 'जले अन्यः कुक्कुरः अस्ति' इति <u>मत्वा</u> कुक्कुरः उच्चैः अभषत्।<br>(iv) छात्राः परीक्षां <u>लेखितुं</u> विद्यालयं गच्छन्ति।<br>(v) शिशुः मातुः समीपं <u>गम्+तुमुन्</u> इच्छति।<br>(vi) जम्बुकः पुनः पुनः <u>कूर्दित्वा</u> श्रान्तः अभवत्। | 6 |

## खण्ड : 'घ'
## पठित-अवबोधनम् - 35 अङ्काः

10 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 5

पञ्चेन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः। मनःपुरःसराणि च इन्द्रियाणि अर्थसंग्रहसमर्थानि भवन्ति। न इन्द्रियवशगः स्यात्। न चंचलं मनः अनुभ्रामयेत्।

गुरु-वृद्ध-आचार्यान् अर्चयेत्। मूर्ध-श्रोत्र-घ्राण-पाद-तलनित्यः स्यात्। अतिथीनां पूजकः स्यात्। काले हित-मित-मधुरार्थवादी स्यात्। वश्यात्मा, महोत्साहः, विनयबुद्धिः, निर्भीकः, क्षमावान्, सर्वप्राणिषु बन्धुभूतः स्यात्।

**I. एकपदेन उत्तरत।**

(i) केषां पूजकः स्यात्?

(ii) इन्द्रियाणां कति अर्थाः भवन्ति?

**II. पूर्णवाक्येन उत्तरत।**

कीदृशः भूत्वा सर्वप्राणिषु बन्धुभूतः स्यात्?

**III. उचितम् उत्तरं चित्वा लिखत।**

(i) 'भवन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) मनः (ब) पुरः

(स) इन्द्रियाणि (द) सराणि

(ii) 'कातरः' इति पदस्य विलोमपदं किम्?

(अ) क्षमावान् (ब) महोत्साहः

(स) निर्भीकः (द) क्षमावान्

11 **अधोलिखितम् पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** 5

इयं स्वयं गच्छतु मानहेतोर्मातेव भावं तनये निवेश्य।
तुषारपूर्णोत्पलपत्रनेत्रा हर्षास्रमासारमिवोत्सृजन्ती।।

| | | | |
|---|---|---|---|
| | | **I. एकपदेन उत्तरत।**<br>(i) सीता कीदृशं भावं निवेश्य गच्छतु?<br>(ii) सीतायाः नेत्रे कीदृशे वर्तेते?<br>**II. पूर्णवाक्येन उत्तरत ।**<br>सीता किमर्थं स्वयं गच्छतु?<br>**III. यथानिर्देशम् उत्तरत -**<br>(i) गच्छतु इति क्रियायाः कर्तृपदम् किम्?<br>(क) स्वयं (ख) इयं<br>(ग) मानहेतु (घ) तनये<br>(ii) पुत्रे इति पदस्य अत्र किं पर्यायपदम्?<br>(क) तनये (ख) भावं<br>(ग) आसार (घ) निवेश्य | |
| | 12 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>आरुणिः -श्वेकेतो! न्यग्रोधफलम् आहर।<br>श्वेतकेतुः - इदं भगवन्!<br>आरुणिः - अत्र किं पश्यसि?<br>श्वेतकेतुः - अणुतराणि इमानि बीजानि।<br>आरुणिः - एषु एकं बीजं भिन्धि।<br>श्वेतकेतुः - भिन्नम्।<br>आरुणिः - अत्र किं पश्यसि?<br>श्वेतकेतुः - न किञ्चन भगवन्।<br>**I. एकपदेन उत्तरत।**<br>(i) आरुणिः पुत्रम् किम् आनेतुम् आदिशति?<br>(ii) श्वेतकेतु : फले किम् पश्यति?<br>**II. पूर्णवाक्येन उत्तरत।**<br>श्वेतकेतुः भिन्ने बीजे किं पश्यति?<br>**III. उचितम् उत्तरं चित्वा लिखत—**<br>(i) 'भगवन्' इति पदम् अत्र कस्मै प्रयुक्तम्?<br>(अ) आरुणये (ब) श्वेतकेतवे (स) फलाय (द) बीजाय<br>(ii) 'आनय' इति अर्थे गद्यांशे किं पदं प्रयुक्तम्? | 5 |

| | | | |
|---|---|---|---|
| | | (अ) इमानि (ब) बीजानि (स) आहर (द) भिन्नम् | |
| 13 | **अधोलिखितपंक्तीनाम् उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत -**<br>(i) स जातो येन जातेन याति वंशः समुन्नतिम्।<br>(क) यस्य जन्ममात्रेण वंशः समुन्नतिम् याति।<br>(ख) यस्य जन्मनः पश्चात् वंशः समुन्नतिम् याति।<br>(ग) यस्य गुणैः समृद्धिभिः च वंशः सर्वविधाम् उन्नतिं करोति।<br>(ii) स्वभाव एवैष परोपकारिणाम्।<br>(क) परोपकारिणः स्वभावतः एव विनम्राः भवन्ति, ते कदापि उद्धताः न भवन्ति।<br>(ख) परोपकारिणः स्वभावतः एव विनम्राः भवन्ति, ते कदापि अनुद्धताः न भवन्ति।<br>(ग) परोपकारिणः स्वभावतः एव अभिमानिनः भवन्ति, ते कदापि उद्धताः न भवन्ति।<br>(iii) सत्सङ्गतिरतो भविष्यसि भविष्यसि।<br>(क) सज्जनानां संगत्या स्वशुभं भवति।<br>(ख) सज्जनानां संगत्या सर्वत्र कल्याणं भवति।<br>(ग) सज्जनानां संगत्या निजाशुभं न भवति।<br>(iv) क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।<br>(क) कालः कार्यस्य आनन्दं नाशयति।<br>(ख) कार्यस्य आनन्दः स्वयम् एव नश्यति।<br>(ग) कार्यस्य स्वादः न्यूनः भवति। | 4 |
| 14 | **(क) अधोलिखितपद्यद्वयस्य अन्वययोः मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयित्वा पुनः लिखत।**<br>आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।<br>क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।।<br>**अन्वयः** - आदानस्य __(i)__ कर्तव्यस्य च __(ii)__ क्षिप्रम् अक्रियमाणस्य __(iii)__ तत् रसम् __(iv)__ ।<br>**(ख)** अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।<br>सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।<br>**अन्वयः** - __(v)__ लोचनं __(vi)__ (भवति। इदम्) अनेकसंशयोच्छेदि __(vii)__ दर्शकम् (भवति)। यस्य न अस्ति सः __(viii)__ एव।<br><br>**मञ्जूषा**<br>कर्मणः, परोक्षार्थस्य, अन्धः, पिबति, प्रदानस्य, सर्वस्य, कालः, शास्त्रम्। | 4 |

| | | | |
|---|---|---|---|
| | | | |
| 15 | **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।**<br>(i) लक्ष्मणः सुमन्त्रं वीक्ष्य अपृच्छत्।<br>(ii) उपकारकं नकुलं हत्वा ब्राह्मणः विषादम् अगच्छत्।<br>(iii) रात्रौ दधि न भुञ्जीत।<br>(iv) राजा आचारहीनान् पुत्रान् दृष्ट्वा अचिन्तयत्। | | 4 |
| 16 | **घटनाक्रमानुसारं अधोलिखितवाक्यानि क्रमेण पुनः लिखत।**<br>(i) विप्रः 'बालकोऽनेन खादितः' इति अवधार्य नकुलं व्यापादितवान्।<br>(ii) नकुलः कृष्णसर्पम् अपश्यत्।<br>(iii) विप्रस्य भार्या स्नातुं गता।<br>(iv) ब्राह्मणः नकुलं बालरक्षायां व्यवस्थाप्य श्राद्धार्थं गतः।<br>(v) माधवः उज्जयिन्याम् वसति स्म।<br>(vi) नकुलस्य मुखं रक्तविलिप्तं भवति।<br>(vii) विप्रः परम् विषादम् अगच्छत्।<br>(viii) नकुलः कृष्णसर्पम् अमारयत्। | | 4 |
| 17 | **( क ) प्रसङ्गानुसारं रेखाङ्कितपदानां उचितम् अर्थं चित्वा लिखत -**<br>(i) न अनृतं ब्रूयात्।<br>(अ) सत्यम् (ब) असत्यम्<br>(स) मधुरं (द) सततम् | | 4 |

(ii) न <u>नक्तं</u> दधि भुञ्जीत।

(अ) प्रभाते (ब) सायंकाले

(स) मध्याह्ने (द) रात्रौ

**( ख ) शब्दानाम् अर्थैः सह मेलनं कुरुत**

| | **शब्दाः** | **अर्थाः** |
|---|---|---|
| (i) | करे | शत्रुः |
| (ii) | रिपुः | भेदनं कुर्यात् |
| (iii) | भिन्द्यात् | हस्ते |
| (iv) | सत्वरम् | शीघ्रम् |

*****